✧˖°*❋ ❋*°˖✧

# শনি বজ্রপংজর কবচম্

# Shani Vajrapanjara Kavacham
## in bengali

✧˖°*❋ ❋*°˖✧

# ॥ শনি বজ্রপংজর কবচম্ ॥

নীলাংবরো নীলবপুঃ কিরীটী
গৃধ্রস্থিতাস্ত্রকরো ধনুষ্মান্ ।
চতুর্ভুজঃ সূর্যসুতঃ প্রসন্নঃ
সদা মমস্যাদ্বরদঃ প্রশাংতঃ ॥

**ব্রহ্মা উবাচ ।**

শৃণুধ্বং ঋষযঃ সর্বে শনি পীডাহরং মহত্ ।
কবচং শনিরাজস্য সৌরৈরিদমনুত্তমম্ ॥

কবচং দেবতাবাসং বজ্র পংজর সংংগকম্ ।
শনৈশ্চর প্রীতিকরং সর্বসৌভাগ্যদাযকম্ ॥

অথ শ্রী শনি বজ্র পংজর কবচম্ ।

ওং শ্রী শনৈশ্চরঃ পাতু ভালং মে সূর্যনংদনঃ ।
নেত্রে ছাযাত্মজঃ পাতু পাতু কর্ণৌ যমানুজঃ ॥ 1 ॥

নাসাং বৈবস্বতঃ পাতু মুখং মে ভাস্করঃ সদা ।
স্নিগ্ধকংঠশ্চ মে কংঠং ভুজৌ পাতু মহাভুজঃ ॥ 2 ॥

স্কংধৌ পাতু শনিশ্চৈব করৌ পাতু শুভপ্রদঃ ।
বক্ষঃ পাতু যমভ্রাতা কুক্ষিং পাত্বসিতস্তথা ॥ 3 ॥

নাভিং গ্রহপতিঃ পাতু মংদঃ পাতু কটিং তথা ।
ঊরূ মমাংতকঃ পাতু যমো জানুযুগং তথা ॥ 4 ॥

পাদৌ মংদগতিঃ পাতু সর্বাংগং পাতু পিপ্পলঃ ।
অংগোপাংগানি সর্বাণি রক্ষেন্ মে সূর্যনংদনঃ ॥ 5 ॥

**ফলশ্রুতিঃ**

ইত্যেতত্কবচং দিব্যং পঠেত্সূর্যসুতস্য যঃ ।
ন তস্য জাযতে পীডা প্রীতো ভবতি সূর্যজঃ ॥

ব্যযজন্মদ্বিতীযস্থো মৃত্যুস্থানগতোপিবা ।
কলত্রস্থো গতোবাপি সুপ্রীতস্তু সদা শনিঃ ॥

অষ্টমস্থো সূর্যসুতে ব্যযে জন্মদ্বিতীযগে ।
কবচং পঠতে নিত্যং ন পীডা জাযতে ক্বচিত্ ॥

ইত্যেতত্কবচং দিব্যং সৌরের্যন্নির্মিতং পুরা ।
দ্বাদশাষ্টমজন্মস্থদোষান্নাশযতে সদা ।
জন্মলগ্নস্থিতান্ দোষান্ সর্বান্নাশযতে প্রভুঃ ॥

**ইতি শ্রী ব্রহ্মাংডপুরাণে ব্রহ্মনারদসংবাদে শনিবজ্রপংজর কবচং সংপূর্ণম্ ॥**

✧˳......°*❋ ❋*°......˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net